# Natya Shastra Chapter 23

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૩

## Document Information

Text title : naaTyashaastra adhyaaya 23

File name : natya23.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : January 29, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૩

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ ત્રયોવિંશોઽધ્યાયઃ ।

વિશેષયેત્કલાઃ સર્વા યસ્માત્તસ્માત્તુ વૈશિકઃ ।
વેશોપચારે સાધુર્વા વૈશિકઃ પરિકીર્તિતઃ ॥ ૧॥

યો હિ સર્વકલોપેતઃ સર્વશિલ્પવિચક્ષણઃ ।
સ્ત્રીચિત્તગ્રહણાભિજ્ઞો વૈશિકઃ સ ભવેત્પુમાન્ ॥ ૨॥

ગુણસ્તસ્ય તુ વિજ્ઞેયાઃ સ્વશરીરસમુત્થિતાઃ ।
આહાર્યાઃ સહજાશ્ચૈવ ત્રયસ્ત્રિંશત્સમાસતઃ ॥ ૩॥

શાસ્ત્રવિચ્છિલ્પસમ્પન્નો રૂપવાન્ પ્રિયદર્શનઃ
વિક્રાન્તો ધૃતિમાંશ્ચૈવ વયોવેષકુલાન્વિતઃ ॥ ૪॥

સુરભિર્મધુરસ્ત્યાગિ સહિષ્ણુરવિકત્થનઃ
અશઙ્કિતઃ પ્રિયાભાષી ચતુરઃ શુભદઃ શુચિઃ ॥ ૫॥

કામોપચારકુશલો દક્ષિણો દેશકાલવિત્ ।
અદીનવાક્યઃ સ્મિતવાન્ વાગ્મી દક્ષઃ પ્રિયંવદઃ ॥ ૬॥

સ્ત્રીલુબ્ધાઃ સંવિભાગી ચ શ્રદ્દધાનો દૃઢસ્મૃતિઃ ।
ગમ્યાસુ ચાપ્યવિસ્રમ્ભી માની ચેતિ હિ વૈશિકઃ ॥ ૭॥

અનુયુક્તઃ શુચિર્દક્ષો દક્ષિણઃ પ્રતિપત્તિમાન્ ।
ભવેચ્ચિત્રાભિધાયી ચ વયસ્યસ્તસ્ય તદ્ગુણઃ ॥ ૮॥

વિજ્ઞાનગુણસમ્પના કથિની લિઙ્ગિની તથા ।
પ્રાતિવેશ્યા સખી દાસી કુમારી કારુશિલ્પિની ॥ ૯॥

ધાત્રી પાષણ્ડિની ચૈવ તથા રઙ્ગોપજીવિની ।

પ્રોત્સાહનેઽથકુશલા મધુરકથા દક્ષિણાથકાલજ્ઞા ॥ ૧૦॥

લઽહા સંવૃતમન્ત્રા દૂતી ત્વેભિર્ગુણૈઃ કાર્યા ।
તયાપ્યુત્સાહનં કાર્યં નાનાદર્શિતકારણમ્ ॥ ૧૧॥

યથોક્તકથનં ચૈવ તથા ભાવપ્રદર્શનમ્ ।
ન જડં રૂપસમ્પન્નં નાર્થવન્તં ન ચાતુરમ્ ॥ ૧૨॥

દૂતં વાઽપ્યથવા દૂતીં બુધઃ કુર્યાત્કદાચન ।
કુલભોગધનાધિક્યૈઃ કૃત્વાધિકવિકત્થનમ્ ॥ ૧૩॥

દૂતી નિવેદયેત્કામમર્થાંશ્ચૈવાનુવર્ણયેત્ ।
ન ચાકામપ્રવૃત્તાયાઃ કૃદ્ધાયા વાપિ સઙ્ગમઃ ॥ ૧૪॥

નાનુપાયઃ પ્રકર્તવ્યો દૂત્યા હિ પુરુષાશ્રયઃ ।
ઉત્સવે રત્રિસઞ્ચાર ઉદ્યાને મિત્રવેશ્મનિ ॥ ૧૫॥

ધાત્રિગૃહેષુ સખ્યા વા તથા ચૈવ નિમન્ત્રણે ।
વ્યાધિતવ્યપદેશેન શુન્યાગારનિવેશને ॥ ૧૬॥

કાર્યઃ સમાગમો નૃણાં સ્ત્રીભિઃ પ્રથમસઙ્ગમે ।
એવં સમાગમં કૃત્વા સોપાયં વિધિપૂર્વકમ્ ॥ ૧૭॥

અનુરક્તા વિરક્તા વા લિઙ્ગાકારૈસ્તુ લક્ષયેત્ ।
સ્વભાવભાવાતિશયૈર્નારી યા મદનાશ્રયા ॥ ૧૮॥

કરોતિ નિભૃતાં લીલાં નિત્યં સા મદનાતુરા ।
સખીમધ્યે ગુણાન્ બ્રૂતે સ્વધનં ચ પ્રયચ્છતિ ॥ ૧૯॥

પૂજયત્યસ્ય મિત્રાણિ દ્વેષ્ટિ શત્રુજનં સદા ।
ગમાગમે સખીનાં યા હૃષ્ટા ભવતિ ચાધિકમ્ ॥ ૨૦॥

તુષ્યત્યસ્ય કથાભિસ્તુ સસ્નેહં ચ નિરીક્ષતે ।
સુપ્તે તુ પશ્ચાત્ સ્વપિતિ ચુમ્બિતા પ્રતિચુમ્બતિ ॥ ૨૧॥

ઉત્તિષ્ઠત્યપિ પૂર્વં ચ તથા ક્લેશસહાપિ ચ ।
ઉત્સવે મુદિતા યા ચ વ્યસને યા ચ દુઃખિતા ॥ ૨૨॥

એવંવિધૈર્ગુણૈર્યુક્તા ત્વનુરક્તા તુ સા સ્મૃતા ।
વિરક્તાયાસ્તુ ચિન્હાનિ ચુમ્બિતા નાભિચુમ્બતિ ॥ ૨૩॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે ત્રયોવિંશઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

---

*Natya Shastra Chapter 23*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*